This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

॥ अथ मुक्ताफल समुच्चय ॥

- प्रारभते -

Acc. No. ~~2885.~~ M-1609

Title - शतरुद्रिय-चन्द्रिका.

Author - शाश्वतेन्द्रसरस्वती (= हंसराजसरस्वती or राजहंससरस्वती)

Date - शके 1755.

Sub - वेदान्त.

folio - 7.

Xerox - 14

Checked 2012

KKSU LIBRARY
RAMTEK
441 106
M-1609
Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शां० रु० चं०

1
॥श्रीगणेशाय नमः॥ ॥विद्यार्थे सर्वशास्त्रेषु तैः संचार्यं हृदयांबुजे॥ आचार्यं सर्वलोकेषु त्वाचार्यं शंक
रं भजे॥१॥ पद्मपादो विश्वरूपो हस्तामलकत्रोटकौ॥ अद्वैतलक्ष्मीसागुरुरवः साचार्याः पंच पांतु मां॥२॥
नारायणेंद्रपादाब्जविद्येंद्रचरणांबुजं॥ नृसिंहेंद्रपदांभोजं केवल्येंद्रपदांबुजं॥३॥ एतानि परमस्तोत्राणि
तोषेरिहृदयांबुजे॥ मामर्कीनेप्रकाशंतां भुक्तिमुक्तिप्रसिद्धये॥४॥ नारायणेंद्रपादाब्जभ्रमरीकृतमानसः॥
श्रीशाश्वतेंद्रो जयति राजहंसपराभिधः॥५॥ इह खलु चतुर्षु वेदेषु समस्तासु चशाखासु श्रिणीकांडानि क्र
मेकांडमुपासनाकांडं ज्ञानकांडं चेति तत्र कर्मकांडार्थनिर्णयकानि सूत्राणि द्वादशाध्यायां सुपासि मी
मांसायां भगवता संकर्षणाचार्येण करिषत ज्ञानकांडार्थनिर्णेतृनि उत्तरमीमांसायां चतुरध्याय्यां भ
गवान् सात्यवतेयो सूत्रयत्॥ एतच्छास्त्रद्वयारिप्रणेतारो विख्याताश्चतुःसागरमेखलायां रत्नगर्भायां एष
खलु कर्मकांडसिद्धांतः॥ कर्तृत्वभोक्तृत्वगुणकाजीवाः प्रतिदेहं नाना कायत्रयविलक्षणाः अग्निहोत्रद
पद्मु० र्शपौर्णमास्यचातुर्मास्यैश्चभ्रातिहविर्यज्ञसप्तसंस्थानां ज्योतिष्टोमादिसप्तसोमसंस्थानांश्चोपासनादि

राम्

1

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सप्तपाकयज्ञसंस्थानां अनाधेयोरुद्देयाः निखिलप्रमाणचूडामणिभगवद्देरपुरुषरक्तकंटमधुरमधु
रसंगीतानां पिपीलिकावधारि ब्रह्मवधानानां परमाप्तभगवद्देरपुरुषेण गद्गदस्वरेणाहस्तचालनपूर्वकं
नर निषिद्धानां चकर्मीणां नारम्येन सुदुःखनारनम्यवंतोभवंतीति ॥ यस्मादित्थं तस्मात्कर्मकांडं द्वैतपरमि
तिजगद्विडिमः ॥ उपास्योपासकोपासनत्रिपुटी प्रतिभानास्पदपास्तिकांडमपि द्वैतपरमिति जगद्दुंदुभिः
संहितारेहाधीभागब्राह्मणतद्गुनरभागारण्यककंबूग्रीवषडंगज्ञानेंद्रियांतरिंद्रियोपांगकर्मेंद्रियस
र्वशाखास्ववीचयवोपशाखासर्ववर्मेमर्मसंधिचतुरूपवेदचतुरंतावलिगलन्मदसौरभ्याकृष्टभ्रम
रीजेगीयमानप्रतापस्तंबेरमसमारूढभगवद्देरपुरुषसमस्तकमाणिक्यकिरीटायमानसमस्तोप
निषत्कलापकलापिनं वेदव्याससमुचितं भगवत्पादविवृतं नारायणेंद्रसरस्वतीप्रभृतिभिः सर्वज्ञक
ल्पैः वहुभिर्व्याख्यातं च ज्ञानकांडमद्वैतपरमिति अखिदिगंगनामधुरकोमलकंटकबुनिः सरसप्तस्वर
विजृंभितजयजयध्वनिः अत्र नमुग्धोपि संदिग्धे विवाद्यपि न विवदते आकाशवाण्यप्येवमेवाभिस्याद्री

शा०स०चं
२

नक्षत्रप्रकटितघनः घनस्तन चिल्लगर्जितायतेइथमिथमेवेतिनारायणेंद्रसरस्व
तीमुखकमलनिर्यद्दमार्कंदविद्रुतडागायमानदक्षिणाकर्णवृदस्मदादिके ठोकेद्दशाः
षट्पंचाशद्देशीयस्वस्वशास्त्राभिज्ञपदवाक्यप्रमाणज्ञविपश्चिद्दरसदः सुविपंचीकल
रवायतेयद्यप्येवं कांडत्रयराद्धांतः। तथापि श्रीगुरुकृपायदिप्राप्तयास्तक्ष्मदृष्ट्यासप्रमाण
युक्तीन्यायरहस्यगुंफनपूर्वकं कर्मोपास्तिकांडयोरप्पष्टेतपरत्वंचतुरतरमुपपादयिष्यते।
आकर्ण्यतां चिंत्यतां तत्सूरिभिः सानुकंपनैः। आर्त्विज्यकर्मनिपुणोः पदवाक्यविचक्षणेः॥१
कणभुग्गोतमप्रोक्तीनामत्रचिंतनमुत्सृजेत्। कणभुग्गोतमौवेदवाक्यार्थस्यविचारणे॥२
नस्मर्तव्यौनमंतव्यौवेदेयुक्तिर्नसंभवेत्॥ किंतूपदेशोस्तियथातथांगीकरणंहृदि॥३५
कर्मकांडेतावत्पत्नीयजमानयोः ऋत्विक्षुपरापर्यसुदेवत्वभावनांविनानुष्ठानंनसंभवति। राम
तथाहि ब्रह्मवरणे। ॐ भूपतेइत्यादिना संबोधितो ब्रह्मा अहंभूपतिरहंभुवनपतिरित्यादिना २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वस्मिन्परमात्मत्वं निश्चिनोति। बोधायनेऽध्वर्युप्रभृतिषु आदित्यत्वादिबुद्धिः। किंच पलाश शाखायाः अचेतनत्वेपि प्रत्युत्तरदानासमर्थत्वेपि हे शारद त्वामिषे त्वा छिनद्मीति सबुद्धिः प्रलयां चा। एवमेव चेतनत्वेपि प्रत्युत्तरदानासमर्थवत्सगवादिसंबोधनप्रार्थने इयमेव शाखा प्रति पशुपालप्रार्थने दर्भतृणमयग्रंथिप्रतिपवित्रत्वयोत्वा अश्वापर्याय रूपालीसंबोध्यतस्या त्रैलोक्यासकलविश्वपोषकत्वाद्युक्तिः। क्षीरसंबोध्यतस्य सवित्राप्यमानत्वप्रार्थनाप्रणी तायां त्वं संबोध्य प्रश्नोत्तरसंलापः। अध्वर्युः स्वस्मिन् त्वं त्विह मनुष्यत्वे परिज्ञायनाहं त्वामुत्तरे णाहवनीयं निदधाम्यपि तु योवेदवेदांतवेद्यः परमेश्वरस्तं वा युनक्तीत्युवाच। प्रत्यक्षकृताध्व र्युः स्वस्य परमेश्वरत्वं भावयति। एवं प्रणीताविमोकमंत्रार्थोपि। इत्थंभावप्रकाराअपिम न्त्र्याच रव्युः। इत्थं होपिक इदमनुवक्ष्यति स इदमनुवक्ष्यतिक आर्त्विज्यं करिष्यति सआ र्त्विज्यं करिष्यतीति स्वास्मिन्नसर्वत्वं वारयति। व्रतोपायने इदमहमिति विवेति कात्यायनविके

5

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मिन्मंत्रेपि अनृतान्मनुष्यत्वधर्मोऽस्य थक्रुभूयाहं स स देवत्वमुपैमि इति यजमानो दे
वोहमिति भावयति । शाखांतरे अरणी प्रदानोत्तरं यजमान एवमेव भावयति । अत
एव वि पर्जनेप्य एवास्मि सोस्मीति मंत्रः । यावत्कर्मकालं देवत्वं दर्शयति । बोधायने
यजमानो गार्हपत्यमुपतिष्ठमानः अहं त्वदस्मि मदसि त्वमिति वदति । ननु कर्मोभ
रकालं मनुष्यत्वादिमवहारात्प्राग्देवत्वं न त्यक्तमिति चेन्मैवं । त्यक्तेपि च यावत्स
माधि निष्प्रपंचत्वं ततो व्यवहारसंगीकारात् । पूर्णाग्निहोत्रहवनमोजडे संबोध्य क
र्मसिद्धि प्रार्थना । इमांस्पृष्ट्वा शकटं संबोध्यते दैत्रे देवसंबंधित्ववन्हितमत्वादिध
र्मारोपणं यज्ञपतिविषये कौटिल्यापरिहारवांछा । अध्वर्युः शकटं संबोध्यारोहन्
विष्णुस्त्वाक्रमतामिति आरोहणकर्तृत्वं वदन् स्वस्य मनुष्यत्वं वारयति । मूतावत्वेति श्री राम
हीन् संबोध्यादिद्रुविः संबोध्यश्रवणपश्चात्प्रमोलक्षापनेच्छा प्रश्नः संबोध्यस्वर्गंम २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लिनयत्तंनयनंवृत्रवधेइन्द्रस्य [illegible] हायसामर्थ्योक्तिः। कस्माजिनोलूखलादी
नियज्ञपात्राणिसंबोध्यशुद्धतासंपादनं। कस्माजिनंसंबोध्यरक्षोरातिकंपनोक्तिः
उलूखलंसंबोध्यचर्मोलूखलयोः मैत्रीकरणंवारंवारंहृव्यकरणादिमुसलंसंबो
ध्यस्तुतिनशम्यामादायकुक्कुटमधुजिह्वत्वादिवचः किंबहुनाअग्निहोत्रदर्शपौर्ण
मासादिसहस्रसंवत्सरसत्रांतासुश्रौतोपुस्मार्तीक्रियासमूहवाधिसंधायमान्
जडाकिंचित्करपदार्थासंबोध्यतेभ्योबांछितंपत्नीयजमानाभ्यांतसोः [illegible]क्तेनयाज्ञिके
श्चाभ्यर्थ्यते। मानुष्यांपत्न्यांएधिवीत्वंविभावप्रमुञ्जयोक्तंसंबोध्यनत्वंमानुषीरास्मा
किंतुअदितेर्भूमिर्देवमातुर्वाराश्नेतिशाखांतरमंत्रोयंशुल्बेनबर्हिर्बंधनेविनियु
क्तः। एवंसमिद्धाहरशादिसंबुद्धिः। समिद्दसिवेदासीत्यादिः। आग्नीध्रः उपहूतइति
मनुष्येनपुरोडाशभागोद्वौभक्षयन्नहमग्निः सनुस्त्वमुखेहभागोवांस्वाहोजुहो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मीतिवदन्ति। एवमेव भाष्यकृतोपि व्याचक्षिरे। अन्यथाग्निराग्नीध्रादिति मंत्रपाग
नुपपत्तिः। एवं ब्रह्मा प्राशित्रं भक्षयन्नेवं वदति। हे पुरोडाशभाग होतरिड्या वा एषित्या
ह्वातरि सति त्वा अश्विपूषबाहुहस्तत्वेन स्वबाहुहस्तभावनां कृत्वा प्रतिगृह्य अहम
ग्निः सन् अत एवाग्नेरास्येन प्राश्नामीति वदन्नूस्वस्यानेकदेवतात्मत्वं प्रदर्शयति।
अन्यथा स्वहस्ताभ्यां प्रतिगृह्य स्वास्येन प्राश्य कथमेवं वदेत् प्रत्यक्षविरोधात्। एवं तु
कृत्स्नवपरिख्यायाहृदादिव्यवहृतिः। यजमानः विष्णुरहमिति निश्चिन्वन् विक्रमा
न् त्रीन् क्रमते त्रिभिर्मन्त्रभिः एवं भाष्यकारैर्मैत्री व्याकरिष्यते किं च उष्णा साभिभ्वा
सयोस्तादात्म्यप्रतीतिरस्ति एवमेकविंशतिसंस्थासु सीमायस्मात् ब्रह्मचरमयं भ
गवन्तं ध्यायं ध्यायं स्मारं स्मारं कर्माणि श्रुतिस्मृतिविहितानि कर्तव्यानि विषय राम
द्ध्यानि चाभ्यां निषिद्धानि ध्येयं च तत्सर्वं च। सर्वं खल्विदं ब्रह्म वासुदेवः सर्वमिति वि ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्टम्भात्मिदं कृत्स्नमित्यादिप्रमाणमाला। ननु तत्तदभिमानिदेवताभेदात्कर्मव्य
वहारोपपत्तौ किं सर्वात्मकब्रह्मनिश्चयेनेति चेन्न ब्रह्मणि चराचरगतमिति कृत्वा स
र्वा चेतनेषु अभिमानिदेवतासिद्धिः। चेतनेष्वपि ब्रह्म जैवेन वेषेण वर्तते। किमु वक्त
व्यमचेतनेषु अभिमानिदेवतारूपेण। विद्यत इति नन्वेतत्सर्वं पूर्वमनेकमिति नांगी
कृतमिति चेत् कर्मजडानां तेषां कर्मप्राधान्यव्यसनं किं बहुना कस्यचित् कुत्रचिदे
व व्यसनं। नारायणेन सरस्वत्युपदिष्टाद्वैतविद्याव्यसनिनामस्माकं कर्मकाण्डमप्य
द्वैतब्रह्मपरमिति त्रिकरण्या असंभावनाविपरीतभावनाविरहितं निश्चितम
स्ति भिन्नरुचिर्हि लोकः। बुद्धिः कर्मानुसारिणी। ननु लिख्यमाणमेवेदं गुरुवचोभ
क्तिवशाद्भावनातिशयाच्च भवता एवं प्रतिभातीति चेन्नैवं। संहितापाठानुक्रमे
णाकर्मसूत्रानुरोधेन भाष्यानुसारेण च भूयसां प्रमाणानां शाखाविच्छेदनमारभ्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विस्मृ क्रमणां तद्विधिनिरूपितत्वात्। प्रवृत्तं त्रेपि न हि निंदा न्यायेन कर्मेतराणि व
स्तु निनिंदितत्वात् सर्वाधिकस्य कर्मणो मूर्धाभिषिक्तः एवमेव कर्मकांड प्राधान्यायेत
रकांडयोरपि विधिनाचेक वाक्यत्वास्तु त्यर्थेनेस्मिन्नधिकरणे तदेकवाक्यत्वमर्थवादत्वं
कर्तस्तावकत्वं चाभ्युपगतं। यथा भागीरथी प्राधान्यायन घंतरतुच्छीकरणं। कावेर्यादिमहिम्ने भा
गीरथी नीचीकरणं च। तथा कावेरी माहात्म्य स्कांदे। कावेरी स्नान माहात्म्य कल्या। र्हंति षोडशीं
त्रिवेण्यां मकरे स्नानान्यमुतानि महीपते इतित स्मात्तच्छास्त्राभिमानमादाय वादिनो विवदंते।
मरुमरीचिजलविभाय वांछ्येज्येष्ठकनिष्ठवत् वस्तुतः समस्तश्रुतिस्मृतीतिहासपुराणपर्यालो
चनया सर्वश्रस्वेति घंटापथदेव भेरीनिनादः। प्रवृत्तत्र कर्मव्यसनिनोप्यंते सर्गात्मकपरमशिवस्य
रणमेव शरणं। अत एवानीश्वरवादिभिर्भट्टाचार्यैस्तत्त्ववार्तिकादौ नमः सोमार्धधारिणे इति मंग। राम
ळमारचितं। राणकादावप्येवमेव। एवमेवापो भुवनमुपदत्र वीदित्यादिश्रुतिगतिः। किंच मिमांस ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कसाहसं किं ब्रूमः देहव्यतिरिक्तआत्मेतिवदंति। ब्राह्मणोहं बटुरहमिति वर्णाश्रमानपि
प्रमापयंति। अतएव वसंते वसंते ब्राह्मणोयजेतेत्यादि स्वानुकूलयंति। नहि प्रत्यक्षेण वर्णा
श्रमाधारदेहधर्मास्तद्भिन्नात्मनि प्रवर्तितुमुचिताः। जीवस्य यदि वर्णाश्रमवत्त्वं तथ्यमभविष्य
त्तर्हि अनेकजन्मस्वपि प्रागुक्तेषु अनेकदुःखतेरप्येकवर्णत्वमेकाश्रमत्वं यथाप्यथमभविष्यत्।
न्नचेष्टापत्तिः। कर्मविपाकशास्त्रानुत्थानप्रसंगात्। किंबहुना मतेप्यिदं हआत्रिपुरुषतदुत्तरका
लं च गोत्रशर्माद्युपादानेमहद्व्यसनं तेषां। ननु वर्णाश्रमानुपादाने विधिनिषेधयोः कागतिरि
ति चेदाकर्णय। अध्यास एव गतिः। अध्यासो नामाहमयं ममेदमिति स्मृतिरूपः परत्र पूर्वदृ
ष्टावभासः अत्र शारीरकमीमांसा। अध्यासनिमित्तकानि विधिनिषेधशास्त्राणीति। अस्मदु
क्तं किंत्वहंताममता त्वंता तवता रज्जुबंधनैः निबद्धाः प्राणिनः सर्वे प्रवर्तंते क्रियास्वामिति। न
न्वध्यासवान्भेदबुध्या क्रियाअनुतिष्ठतीति चेत् तूहं नहंअमेधाविन्सर्वात्मब्रह्मबुद्धिं विना न कर्मानु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्टानमितिप्रागुक्तास्मत्प्रियहितवचनं माविस्मार्षीरित्यलं देशिकेंद्रकृतोंकारोपदेशसंजातप्र
तापप्रभावाविष्करणैः।एवमुपासनाकांडमप्यद्वैतपरमेव।देवोभूत्वादेवानप्येतीतिश्रुतेः।आमर
णंनानाविधोपासनानिकृत्वा तद्वासनावासितस्तांदेवतांस्मृत्वाप्रत्याप्नोति।यंयंवापिस्मरन्भावं
त्यजत्यंतेकलेवरं।तंतमेवेति कौंतेय सदा तद्भावभावित इति गीतोक्तेः।कर्मसमृद्धिफलकोद्गीथादि
विद्याभ्यो ब्रह्मलोकफलकाविधाभ्यश्चान्यत्रायंविचारः।उद्गीथादीनां कर्मकांडांतर्भावः।अंगावब
द्धोपासनत्वात् ब्रह्मलोकफलविद्यानां ज्ञानकांडांतर्भावंपरांतकालेपरामृतात्परिमुच्यंति सर्वे इतीति
निर्गुणोक्तेर्मुक्तेः सिद्धांतितत्वात्।एतदुभयविधान्योपासनानां वासनावासितागतिः।तं यथाय
थोपासते तदेव भवतीति मंडलब्राह्मणोक्तेः।यद्यप्याद्यकांडद्वये व्यवहारेप्यभेदप्रतीतिस्तथापि
परमार्थेनाभेदप्रतीतिः।वेदांतेपि अभेदः।परमार्थेन भेदोपि व्यवहारकृद् इति राद्धांतः।यस्मादेवंत राम
स्माच्छ्रुतिस्मृतीतिहासपुराणपौरुषेयादि अर्थमात्रेण भेदो व्यवहाराय महामायाविलासिनी वि ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लसितः अमेदः परमार्थविद्यादेवांगनाहेलालीलायितः यस्मादेवं तस्मात्॥ चराचरमयं ब्रह्मब्रह्मांड
मयमीश्वरं॥ भावयिस्ता तितुष्यंतु रांतारांतामुमुक्षवः॥१॥ महतश्च महीयांसमणीयांसमणोरपि॥
प्राणिमात्रगुहावासं वंदेहं पार्वतीपतिं॥ यस्यार्यो पुत्रमित्राद्याः सर्वज्ञा विश्वपूजिताः ब्रह्मांडनायका
सर्वेतं वंदे बापतिं शिवं॥३॥ यज्जायाजगतांमाता यस्तु जगतः पतिः॥ यद्वधूर्देवसेनाख्यातं वंदे प
रमेष्ठिनं॥४॥ पत्नीयन्मस्तकारूढा यरूपां गां चलेंदिरा॥ सरस्वती यदाज्ञायां कुर्यान्मां स शिवः शिवं॥
५॥ यद्वाहो जगदीधौरेय भूत्याः प्रमथास्तथा॥ शास्ताऽरुः सर्वजगतां स शिवः पातु नः सदा॥६॥ वीरभ
द्रो भैरवश्च तथान्येऽमिततेजसः॥ यस्याचतारा श्चानंताः पायाद्दाक्षायणीपतिः॥७॥ एवं ग्रंथं समा
रभ्य प्रार्पयामि स्म सादरं॥ पुराणयोश्च जंपत्योः पादुकाभ्यां महौजसोः॥८॥ इति श्रीपरहंसप
रिव्राजकाचार्यनारायणेंद्रसरस्वत्याः श्रीतेवासि रामचंद्रापरयोगपट्टहंसराजसरस्वतीप्रणि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रा०रू०चं०
७

ता॥कांडत्रयसिद्धांतशातरुद्रीकाचंद्रचंद्रिकासमाप्ता॥ ॥छ॥ ॥शके१७५५विजयना
माब्देशारदिभाद्रपद[illegible]वद्य१४चतुर्दश्यामिंदुवासरेतद्दिनेदीपसमयेइदंपुस्तकंसमाप्ति
मगमत्॥ ॥छ॥ ॥छ॥ ॥इदंपुस्तकंदेवोपनामकसखारामदेवसूनुना
नारायणेनलिखितंस्वार्थंपरार्थंच॥ ॥छ ॥छ ॥छ॥ ॥छ॥ ॥

राम
७

KKSU LIBRARY
RAMTEK
441 106
M-1609
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=21.10.20 12:18
,TRANSFERRED=2020/10/21 at 12:20:17
,PAGES=14
,TYPE=STD
,NAME=S0004291
,Book Name=M-1609-SHATRUDRIY CHANDRIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection